# Shri Tyagaraja Muchukunda Sahasranamavali

# શ્રીત્યાગરાજમુચુકુન્દસહસ્રનામાવલિઃ

## Document Information

Text title : shrI tyAgarAjamuchukundasahasranAmAvalI

File name : tyAgarAjamuchukundasahasranAmAvalI.itx

Category : sahasranAmAvalI, shiva, nAmAvalI

Location : doc_shiva

Transliterated by : Sivakumar Thyagarajan shivakumar24 at gmail.com

Proofread by : Sivakumar Thyagarajan, PSA Raswaran psaeaswaran at gmail.com

Latest update : January 13, 2017

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 18, 2020

*sanskritdocuments.org*

# શ્રીત્યાગરાજમુચુકુન્દસહસ્રનામાવલિઃ

ૐ શ્રીગણેશાય નમઃ ।

ૐ શ્રીમત્ત્યાગમહારાજાય નમઃ ।
શ્રીમત્સિંહાસનેશ્વરાય ।
શ્રીરાજરાજાય ।
શ્રીનાથહૃદયામ્બુજમધ્યગાય ।
શ્રિયા સહનિવાસાય ।
શ્રીનાથપરિપૂજિતાય ।
શ્રીપુરૈકનિવાસિને ।
શ્રીહંસનટનેશ્વરાય ।
શ્રીવિદ્યાત્મકરૂપાય ।
શ્રીપીઠાન્તર્નિવાસિને ।
શ્રીવિદ્યાચ્છાદિત હૃદયાય । આચ્છાદ્ય
શ્રીવિદ્યાહંસસમ્પુટાય ।
શ્રીવિદ્યાપરિધાનાખ્યાય ।
શ્રીપૂજિતપદામ્બુજાય ।
શ્રીમત્ત્યાગવિનોદાખ્યવાસનૈકબહુપ્રિયાય ।
શ્રીશિવાય ।
શ્રીશિવતરાય ।
શ્રીશિવાયાઃ પ્રિયઙ્કરાય ।
શ્રીવિદ્યાયાસ્ત્રિખણ્ડાત્મસોમાસ્કન્દસ્વરૂપવતે ।
શ્રીમૂલાધારનિલયાય નમઃ । ૨૦

ૐ શ્રીભારતીશિવાપ્રિયાય નમઃ ।
સચ્ચિદાનન્દરૂપાય ।
શ્રીવિદ્યામોઘવૈભવાય ।
સદાશિવમહાકારસર્વાગમવિવેચિતાય ।

સત્પૂજ્યાય ।
સકલાય ।
સર્વાતીતસ્વરૂપિણે ।
સર્વભૂતાન્તરાત્મને ।
સર્વભૂતલયકર્ત્રે ।
સર્વસાન્નિધ્યકારકાય ।
સર્વમન્ત્રમયાકૃતયે ।
સર્વમન્ત્રેશ્વરાય ।
સર્વયન્ત્રેશ્વરાધિપાય ।
મહાકલ્પમહાઘોરમહાતાણ્ડવનાયકાય ।
અજપાતાણ્ડવપ્રિયાય ।
હંસતાણ્ડવસુપ્રીતાય ।
હાદિવિદ્યાસ્વરૂપિણે ।
અમ્બિકાગુહસંયુતાય ।
અરિષ્ટમથનાય ।
સર્વારિષ્ટવિનાશનાય નમઃ । ૪૦

ૐ સર્વભૂતસ્વરૂપિણે નમઃ ।
સર્વભૂતાધિપેશ્વરાય ।
સર્વસઙ્ક્ષોભહારિણે ।
સદારાધ્યાય ।
સમાકૃતિને । સમાકૃતયે
સર્વશક્તિમયાય ।
સર્વસમાનાધિકવર્જિતાય ।
સર્વમઙ્ગલરૂપાય ।
નમતાં સદ્ગતિપ્રદાય ।
મૂલમન્ત્રસ્વરૂપિણે ।
મુલવિદ્યાજપપ્રિયાય ।
મૂલશૃઙ્ગાટનિલયાય ।
મુક્તિમાર્ગપ્રકાશકાય ।
રથપ્રિયાય ।
ભૂમિરથાય ।

ચન્દ્રભાસ્વચ્ચક્રરથાય । var ચન્દ્રભાસ્કરચક્રરથાય
ક્ષોણીરથવરાસીનાય । વરાસનાય
મહારથવરસ્થિતાય ।
ચતુઃષષ્ટિકલાસ્તમ્ભરથારૂઢમહારથાય ।
શતારચક્રસંયુક્તરથારોહણશોભનાય નમઃ । ૬૦

ૐ ત્રિતત્ત્વરથસંસ્થાયિને નમઃ ।
શિવતત્ત્વવિમાનગાય ।
શ્રીગણાધીશ્વરસ્કન્દદ્વારપદ્રથભાસુરાય ।
var ગણાધીશ્વરસંયુક્ત સરસ્કન્દ દ્વારોધદ્રથ ભાસુરાય
અશ્વાયિતચતુર્વેદાય ।
રથાવનિપરાયણાય ।
શરાયિતરમાકાન્તાય ।
સારથીભૂતવિશ્વસૃજે ।
ચાપાયિતમહામેરવે ।
તૂણીકૃતમહાર્ણવાય ।
ગુણીકૃતફણીશાનાય ।
શાસ્ત્રરજ્જુસમાકૃતાય ।
માર્તાણ્ડપ્રતિમદ્યુતયે ।
સોમસુન્દરવિગ્રહાય ।
મેરુતુલ્યત્રિચક્રાત્મરથેન ત્રિદિવાગતાય ।
સૌધસાન્નિધ્યસમ્પૂર્ણવીથીસઞ્ચારસુન્દરાય ।
મહાફણિમહારજ્જુસમાકૃષ્ટમહારથાય ।
મન્દસ્મિતમુખામ્ભોજસ્મિતદગ્ધપુરાસુરાય ।
લલાટનયનજ્વાલાજાલદગ્ધાઙ્ગમન્મથાય ।
પાદપ્રહારસઙ્ક્ષુબ્ધવક્ષઃસ્થલકૃતાન્તકાય ।
પાદાગ્રકલ્પિતાત્યુગ્રચક્રચ્છિન્નજલન્ધરાય નમઃ । ૮૦

ૐ પાદાન્તર્દર્શનાર્થાય ગજસંહારકર્મકૃતે નમઃ ।
દક્ષયજ્ઞસમુત્પન્નશિવનિન્દાનિવારકાય ।
વિધિગર્વશિરોહારિકપાલમાલયા યુતાય ।
અન્ધકાસુરવિચ્છેદજગદ્ધ્વાન્તનિવારકાય ।
દશાસ્યભુજદર્પઘ્નપાદાઙ્ગુષ્ઠબલોજ્જ્વલાય ।

કુણ્ડલિન્યધિદેવાય ।
કુલકુણ્ડાલયસ્થિતાય ।
આધારકુણ્ડલિન્યસ્તદક્ષપાદસરોરુહાય ।
પરાશક્તિપરાધીશપરાખ્યાકુણ્ડલીશ્વરાય ।
કુટિલારૂપકુણ્ડલ્યારોપિતસ્વપદામ્બુજાય ।
શ્રીમત્સહસ્રપત્રાખ્યકુલકુણ્ડાલયસ્થિતાય ।
કટકીકૃતભોગીન્દ્રકુણ્ડલીકૃતપન્નગાય ।
પિઙ્ગલેડારજ્જુબદ્ધકુણ્ડલીવૃષભધ્વજાય ।
કુણ્ડલ્યુપરિવિન્યસ્તકિઙ્કિણીપદશોભિતાય ।
શબ્દોપાદાનસર્વાત્મશક્તિકુણ્ડલિભૂષણાય ।
ચલન્નૂપુરપાદાબ્જાય ।
અજ્ઞાનતિમિરારુણાય ।
પાદપઙ્કજવિન્યસ્તપઞ્ચશીર્ષફણીશ્વરાય ।
પ્રાણાયામપરપ્રાણાય ।
પ્રાજ્ઞાપ્રાણપ્રકાશકાય નમઃ । ૧૦૦

ૐ સુષુમ્નાન્તરવાસિને નમઃ ।
શિષ્ટેષ્ટસિદ્ધિદાયકાય । var શિષ્ટદાયકાય
શરભાશ્લિષ્ટદેહાય ।
શરભાય ।
સાલ્વપક્ષિરાજે ।
નૃસિંહગર્વસર્વસ્વનિર્વાપણધુરન્ધરાય ।
પ્રલયાનલસજ્વાલહાલાહલવિષાશનાય ।
સપિઙ્ગલસુશોભાભસૂક્ષ્માય । અવસૂક્ષ્મણાય
સ્થૂલગોપુરાય ।
ચતુર્વેદમયસ્તમ્ભરઙ્ગમધ્યસ્થલસ્થિતાય ।
સહસ્રદલપદ્મસ્થસુધાસારાભિવર્ષણાય ।
ચતુર્યોગયુગદ્વારસદાનન્દરસસ્થિતાય ।
ચતુઃષષ્ટિકલા શોભિનિજાલયયુતાય । ષષ્ટિજાલ
કલાષોડશકસ્તમ્ભસહસ્રસ્થાનમધ્યગાય ।
સહસ્રપાદમાણિક્યમણ્ડપસ્થાનનાયકાય ।
દેવાશ્રયમહારત્નમણ્ડપાસીનદૈવતાય ।

પતાકાપટલૈ રાજદગ્રમણ્ડપશોભિતાય ।
તારાકારસમાકારસ્તૂપીપઞ્ચકમધ્યગાય ।
અષ્ટાદશપુરાણાર્થવાઙ્મનાન્ચુતમન્દિરાય ।
અષ્ટાવિંશતિમન્ત્રાત્મફલકાકીલિતાસનાય નમઃ । ૧૨૦

ૐ રત્નસ્તમ્ભસહસ્રાઢ્યકલાસમ્પૂર્ણમન્દિરાય નમઃ ।
કલાપઞ્ચકસંસિદ્ધભિત્તિ યુક્તસભાન્તરાય । સંસિદ્ધભક્તિ
વીથીવિટઙ્કરૂપાય ।
સ્વયમ્ભૂતસ્વરૂપવતે ।
વિટઙ્ગવિષ્ણુહૃદયનિવાસોત્સુકમાનસાય ।
વિટઙ્કવીથીસમ્ભૂતશ્વાસનિઃશ્વાસરૂપવતે ।
વિટઙ્કવીથીસમ્ભૂતવ્યષ્ટિદ્વારવિનિર્ગતાય ।
વિટઙ્કવિવિધાકારવીથીસઞ્ચારમઞ્જુલાય ।
વિધિવિષ્ણુવિરાડ્વિશ્વવીથીવિટઙ્કરૂપવતે ।
વિટઙ્કાવયવાય ।
વીરખડ્ગદ્વયાન્વિતાય ।
અજ્ઞાનતિમિરત્યાગવિજ્ઞાનમયવેદનાય ।
કારણેશપરિત્યાગનિત્યાનન્દનિજાસનાય ।
સર્વોપાધિપરિત્યાગસર્વત્યાગરમાન્વિતાય ।
ત્યાગવૈભવસંયુક્તત્યાગધ્વજવિરાજિતાય ।
વિદ્વજ્જનધનત્યાગિને ।
ત્યાગિત્યાગપરાયણાય ।
સર્વબન્ધપરિત્યાગિસર્વસંશુદ્ધિકારકાય ।
બ્રહ્માદિકારણત્યાગરાજરાજશિખામણયે ।
કલિદોષપરિત્યાગકલ્મષાદિવિવર્જિતાય  નમઃ । ૧૪૦

ૐ અધ્વષટ્કપરિત્યાગરાજમાનપદામ્બુજાય નમઃ ।
ષડાધારપરિત્યાગપરમાનન્દવિગ્રહાય ।
દુષ્ટદૂરપરિત્યાગશિષ્ટમાર્ગપ્રવર્તકાય ।
અશેષદુરિતત્યાગપ્રભામણ્ડલમધ્યગાય ।
પ્રભામણ્ડલસત્યાગરાજમાનમહેશ્વરાય ।
પ્રપઞ્ચકાલસત્યાગરાજમાનતટિત્પ્રભાય ।
પ્રમાણરીતિસત્યાગપ્રમાણૈકશિરોમણયે ।

કારણેશપરિત્યાગકલ્પિતાત્મમહાકૃતયે ।
કલાષોડશસત્યાગનાદાન્તલિખિતાકૃતયે ।
પઞ્ચમન્ત્રષડઙ્ગાદિપરિત્યાગપદામ્બુજાય ।
મેધાદિગોન્મનાન્તાદિપરિત્યાગવિરાજિતાય ।
અશેષસારત્યાગિને ।
અમૃતામ્ભોધિમધ્યગાય ।
પરાત્પરતરાય ।
પરાપરવિવર્જિતાય ।
સાયાહ્નજ્વલનોદ્ભૂતનીરાજનવિરાજિતાય ।
પુરત્રયજયોદ્ભૂતનીરાજનવિરાજિતાય ।
ઇન્દ્રાણીહસ્તવિન્યસ્તનીરાજનવિરાજિતાય ।
ત્રિતત્ત્વવૃત્તિનીરાજ્યનીરાજનવિરાજિતાય ।
કાલભજ્જનવિશ્રાન્તિનીરાજનવિધિપ્રિયાય નમઃ । ૧૬૦

ૐ કાલભઞ્જનકાલાગ્નિજ્વાલાનીરાજનપ્રિયાય નમઃ ।
કાલભજ્જનવિશ્રાન્તિગૌરીનીરાજનપ્રિયાય ।
મહાપ્રલયકાલાન્તગૌરીનીરાજનપ્રિયાય ।
રમાવાણીશચીમુખ્યનીરાજનબહુપ્રિયાય ।
ત્રિતત્વવૃત્તિનીરાજ્યનીરાજનસુરક્ષિતાય ।
ઉપસંહારસાયાહ્નનીરાજનસુરક્ષિતાય ।
સાયાહ્નજ્વલનોદ્ભૂતક્ષારક્ષિતવિષ્ટપાય ।
સંસારાર્ણવસમ્મગ્નસમુદ્ધરણપણ્ડિતાય ।
દેવલોકાગતાભૌમપારિજાતસુમાર્ચિતાય ।
જવન્તીકુસુમાબદ્ધકૃષ્ણાગરુસુકર્ણિકાય ।
મલ્લિકામાલતીજાતીમૃદુલાઙ્ગમનોહરાય ।
રમ્ભાપુષ્પાઞ્ચલિપ્રીતાય ।
પઞ્ચાષ્ટકુસુમાર્ચિતાય ।
કહ્લારકુસુમપ્રીતાય ।
જવન્તીકુસુમોજ્જ્વલાય ।
પરશમ્ભૂહૃદુદ્ભૂતજવન્તીકુસુમપ્રિયાય ।
પઞ્ચભૂતાત્મકોત્ફુલ્લમલ્લિકાદામમણ્ડિતાય ।
જવન્તીમલ્લિકાજાતીકહ્લારસ્રઙ્મનોહરાય ।

ચમ્પકાશોકપુન્નાગસૌગન્ધિકસુગન્ધિતાય ।
દેવવાપીસમુદ્ભૂતકહ્લારકુસુમપ્રિયાય નમઃ । ૧૮૦

ૐ દેવલોકાગતાભૌમપુષ્પમણ્ડપમણ્ડિતાય નમઃ ।
સદાશિવમુખોદ્ભૂતસૌગન્ધિકુસુમપ્રિયાય ।
મન્દારતરુસન્તાનમહારાધનતત્પરાય ।
ગઙ્ગાલઙ્કૃતમૂર્ધ્ને ।
જ્ઞાનચન્દ્રકલાધરાય ।
પૂર્વાઙ્ગરમ્યદેહાય ।
અપરાઙ્ગમનોહરાય ।
અત્યન્તસુન્દરતરરસાપાઙ્ગવિરજિતાય ।
અતિસુન્દરસર્વાઙ્ગાય ।
અમ્બિકાસ્કન્દસુન્દરાય ।
અશેષદુરિતધ્વંસિને ।
વિશેષસુખદાયકાય ।
અરિષ્ટમથનાય ।
સર્વારિષ્ટવિનાશનાય ।
પરિત્યક્તદુરાચારાય ।
શિષ્ટમાર્ગપ્રકાશકાય ।
દુઃખસાગરનિર્મગ્નસમુદ્ધરણપણ્ડિતાય ।
અનન્તકાલસત્યાત્મને ।
સ્થિરવિદ્યુત્સમપ્રભાય ।
પ્રમાણવેદ્યરૂપાય નમઃ । ૨૦૦

ૐ ત્યાગવિદ્યાવિનોદાય નમઃ ।
કવિતારસિકાય ।
કવયે ।
સ્વહૃદાવેદ્યચિદ્ધનાય ।
તેજોગર્ભિતમાર્તાણ્ડચિદાનન્દનિજાર્ચિતાય ।
નિષ્કલાકારસદનસકલીકૃતવિગ્રહાય ।
દિવ્યચક્રગણાધીશાય ।
બીજચક્રપિતામહાય ।
બિન્દુચક્રસ્થવિષ્ણવે ।

નાદચક્રમહેશ્વરાય ।
શક્તિચક્રસ્થજીવાત્મને ।
શાન્તિચક્રપરાત્મકાય ।
શાન્ત્યતીતેન્દુબિમ્બસ્થગુરવે ।
પરમચિન્મયાય ।
નિષ્કમ્પાય ।
અચલમૂર્તયે ।
શ્વાસનિઃશ્વાસકમ્પિતાય ।
અન્તર્યામિને ।
જગદ્ધાત્રે ।
કર્ત્રે ।
કારયિત્રે નમઃ । ૨૨૦

ૐ વામરૂપજગાદ્ધાત્રે નમઃ ।
જ્યેષ્ઠરૂપજનાર્દનાય ।
રૌદ્રરૂપહરાકારાય ।
મહાબિન્દ્વાસનસ્થિતાય ।
અમ્બિકારૂપવિલસચ્છાન્ત્યા સમરસગતાય ।
તુર્યાતીતસમાગમ્યસ્વાનુભૂતિપ્રમાણગાય ।
આત્મતત્ત્વાધિપબ્રહ્મણે ।
વિદ્યાતત્ત્વાધિપહરયે ।
શિવતત્ત્વાધિપરુદ્રાય ।
સર્વતત્ત્વાધિપશિવાય ।
સર્વાર્થસવશબ્દાત્મસર્વશબ્દૈકકારણાય ।
સર્વભૂતાનુકમ્પિને ।
સર્વાપાશવિમોચકાય ।
સર્વયોનિક્ષોભકાય ।
સર્વબીજસ્વરૂપવતે ।
સર્વભૂતદયાલવે ।
સર્વભૂતાભયપ્રદાય ।
મહાપ્રકાશદિવ્યાત્મને ।
મહાનન્દમહાનટાય ।

મહામન્ત્રાય નમઃ । ૨૪૦

ૐ મહાયન્ત્રાય નમઃ ।
મહાવાચ્યાય ।
મહાવપુષે ।
મહામન્ત્રસ્વરૂપાય ।
મહાસૌન્દર્યવારિધયે ।
મહાભૈરવબેષાય ।
મહાવિજ્ઞાનવિગ્રહાય ।
મહાબલસમાયુક્તાય ।
મહામાતઙ્ગમર્દનાય ।
હરિમોહનભિક્ષાટસમ્ભવસ્વાત્મકૈઙ્કરાય ।
note  અત્ર મોહિન્યવતારભૃતો વિષ્ણોઃ ભિક્ષાટાવસરભૃતશ્ચ
શિવસ્ય પુત્રભૂતસ્ય હરિહરપુત્રસ્ય દ્રાવિડ્યાં “અય્યનાર્”
ઇતિ ખ્યાતસ્ય નિર્દેશઃ ।

સુવર્ણવર્ણરુચિરાય ।
સુન્દરાય ।
સુન્દરપ્રિયાય ।
સુન્દરેશસ્ય વૈવાહ્યસ્થગય્યશાસનીકૃતાય ।
note  અત્ર “તડુત્તુ આટ્કોણ્ડાર્” stopped and accepted
ઇતિ દ્રાવિડયુક્તેરનુવાદઃ કૃતઃ ।

સુન્દરપ્રોક્તપદ્યૌઘશ્રવણોત્સુકમાનસાય ।
સુન્દરપ્રાર્થનાનાક્લૃપ્તદૌત્યકર્મવિહારવતે ।
દેવાશ્રયસમાયાતભક્તપદ્યાદ્યવાક્પ્રદાય ।
ભક્તસુન્દરસઙ્ગીતદ્રાવિડસ્તોત્રતોષિતાય ।
વૃદ્ધિક્ષયવિહીનેન્દુસુન્દરપ્રિયદર્શનાય ।
પરવાસુન્દરદ્વન્દ્વસન્ધાનક્ષમપેશલાય નમઃ । ૨૬૦

ૐ પરવાગીતસન્તુષ્ટાય નમઃ ।
પરવાદૌત્યકોવિદાય ।
કૃતવાતપુરેશજ્ઞાનદીક્ષોપદેશાય ।
જ્ઞાનસમ્બન્ધપદ્યૌઘશ્રવણોત્સુકમાનસાય ।

માણિક્યવાચકપ્રોક્તશ્રીવાચકબહુપ્રિયાય ।
એકવિંશતિસઙ્ખ્યાતપદ્યદ્રાવિડતોષિતાય ।
વીરમુણ્ડમહાભક્તસંવદાદ્ભિત્તિલીનકાય ।
પ્રતિજ્ઞાભેદસઙ્ક્લૃપ્તસ્વાગમાત્પદખણ્ડિતાય ।
સ્વભક્તવીરમુણ્ડસ્ય પાદદર્શનમોક્ષદાય ।
ભક્તાનાં ચિત્તશુદ્ધ્યર્થં દેવતીર્થજલાપ્લુતાય ।
વૃદ્ધરૂપૌ સમાલોક્ય સુન્દરસ્નાનતોત્થિતાય ।
note પ્રસિદ્ધાં કામપિ ત્યાગેશસુન્દરમૂર્તિકથાં પરમૃશતિ ।

બિન્દુનાદકલાક્લૃપ્તસાઙ્ગોપાઙ્ગમનોહરાય ।
ચિદ્ગન્ધદિવ્યપ્રસવમાલાવૃતભુજાન્તરાય ।
મહાનુભાવાય ।
મહિતાય ।
મહાતેજસે ।
મહાયશસે ।
મહાબુદ્ધયે ।
મહાસિદ્ધયે ।
મહામાયાપરિચ્છદાય નમઃ । ૨૮૦

ૐ નાનાસિદ્ધાન્તકર્ત્રે નમઃ નમઃ ।
નાનાગમવિધાયકાય ।
નાનાગમમહામોહવ્યપનોદનપણ્ડિતાય ।
દિવ્યવેષાય ।
દિવ્યતનવે ।
દેવસિદ્ધૌઘવન્દિતાય ।
ભક્તહૃત્પદ્મમાર્તાણ્ડાય ।
ભક્તેન્દીવરચન્દ્રમસે ।
ઉમાસ્કન્દમુખાલોકિને ।
ઉમાસ્કન્દાતિવત્સલાય ।
ઉમાસ્કન્દોલ્લસત્પાર્શ્વાય ।
સ્કન્દોમાપ્રેમવર્ધનાય ।
સ્કન્દોમાનયનાનન્દવિધાનૈકધુરન્ધરાય ।
સ્કન્દોમાવન્દિતાય ।

દેવાય ।
સ્કન્દોમાનન્દવિગ્રહાય ।
મુકુન્દમુચુકુન્દેન્દ્રવિધિમુખ્યૈઃ સમાગતાય ।
શ્રીવિદ્યાર્ણામ્બરચ્છન્નદિવ્યાવયવકાન્તિમતે ।
ભક્તકલ્પદ્રુમસમાય ।
ભક્તસર્વાર્થસાધકાય નમઃ । ૩૦૦

ૐ રાહુગ્રસ્તાત્મબાલાર્કમણ્ડલાકૃતિભાસુરાય નમઃ ।
મન્દસ્મિતમુખાય ।
મન્દવાતવાતાયનોત્સુકાય ।
દક્ષવાતાયનાયાતનારીગીતશ્રવણકૌતુકાય ।
પઞ્ચાશદ્વર્ણજ્યોતિઃપ્રભામણ્ડલમધ્યગાય ।
શુદ્ધપઞ્ચાક્ષરજ્યોતિઃસંસ્થિતાનન્દવિગ્રહાય ।
પ્રભારાશિમધ્યગતાય ।
જ્યોતિષાં જ્યોતિષે ।
અવ્યયાય ।
અખણ્ડાનન્દચિન્મૂર્તયે ।
અપારકરુણાનિધયે ।
વરપ્રાસાદચક્રસ્થકલાકલ્પિતવિગ્રહાય ।
સપ્તકોટિમહામન્ત્રજનકાય ।
મન્ત્રરૂપવતે ।
વ્યોમવ્યાપિમહામન્ત્રવર્ણિતાનેકશક્તિકાય ।
પરાપરમહામન્ત્રનાયકસ્તુતવૈભવાય ।
મન્ત્રાભિમાનિમન્ત્રજ્ઞાય ।
મન્ત્રપ્રકૃત્યૂર્જિતાય ।
મન્ત્રાધિષ્ઠાનરૂપાય ।
મન્ત્રમન્ત્રેશ્વરાય ।
અથર્વણમહામન્ત્રપ્રોક્તમઙ્ગલવિગ્રહાય નમઃ । ૩૨૦

ૐ હંસમન્ત્રષડઙ્ગાભહંસવ્યત્યાસનર્તનાય નમઃ ।
બ્રહ્માઙ્ગમન્ત્રસમ્પન્નગુપ્તલાસ્યૈકતત્પરાય ।
સપ્તકોટિમહામન્ત્રનિષેવિતપદામ્બુજાય ।
દેવતાગણપસ્તુત્યધ્વનિમન્ત્રવિશારદાય ।

માયામન્ત્રમહામૂલવિદ્યાસમ્ભૂતતત્પરાય ।
નિગમાગમમન્ત્રાદિનિર્મિતાત્મસ્વરૂપવતે ।
નિરિન્ધનમહાસંવિદગ્નિત્રિભુવનોજ્જ્વલાય ।
યજ્ઞાય ।
યજમાનાય ।
હવિષે ।
હોત્રે ।
યજ્ઞભૃતે ।
મૃકણ્ડુસૂનુરક્ષાર્થવ્યસૂકૃતકૃતાન્તકાય ।
જનિતાત્મભુવશ્રીમતે ।
ગોરૂપિણે ।
ગોસવપ્રિયાય ।
વત્સીકૃતકૃતાન્તસ્ય રથચક્રમૃતીકૃતાય ।
અનપાયમહીપાલભક્તિપ્રકટનોદ્યતાય ।
અનપાયપુરેશાનાય ।
નિરપાયબલાન્વિતાય નમઃ । ૩૪૦

ૐ મહાત્મને નમઃ ।
મહૈશ્વર્યાય ।
મહાબલપરાક્રમાય ।
મુમુક્ષુભિર્જ્ઞેયરૂપાય ।
અજ્ઞાનામતિદુર્લભાય ।
શ્રીમતે આદિભિક્ષવે । var આદિભિક્ષેશ્વરાય
ઈશ્વરાય ।
અનીશ્વરાય ।
વાચ્યવાચકરૂપાય ।
અવાચ્યાય ।
વાઞ્છિતાર્થદાય ।
નવગ્રહમયજ્યોતિષે ।
સંસારભ્રમકારકાય ।
સંસારભ્રમવિચ્છિત્તિકારણજ્ઞાનદાયકાય ।
પરબ્રહ્મસ્વરૂપિણે ।

પરાશક્તિપરિગ્રહાય ।
પાટલીમૂલનિલયાય ।
શ્રુઙ્ગારવનમધ્યગાય ।
દૂર્વાસોમુચુકુન્દાદિનિર્મિતાલયસંસ્થિતાય ।
દૂર્વાસોમુનિના ક્લૃપ્તસ્વાગમાર્ચનપૂજિતાય ।
દૂર્વાસોમુનિના ક્લૃપ્તસ્વતન્ત્રવિષયાદ્ભુતાય ।
દેવેન્દ્રપૂજિતાય નમઃ । ૩૬૦

ૐ દિવ્યદેવસઙ્ઘપ્રપૂજિતાય નમઃ ।
પુલોમજાર્ચિતપુણ્યાય ।
પુરુહૂતબહુપ્રિયાય ।
અપ્સરોહસ્તવિન્યસ્તચામરસ્તોમવીજિતાય ।
અશેષદેવતાક્લૃપ્તપુષ્પવર્ષૌઘવર્ષિતાય ।
ઐરાવતસમાનીતદેવસિન્ધુજલાપ્લુતાય ।
જિહ્વાનાથેરિતાનેકગાનપ્રિયદયાનિધયે ।
દેવભાષાવિશેષજ્ઞાય ।
દેવગાનપ્રિયાય ।
વિભવે ।
મુચુકુન્દાર્ચિતાય ।
મુખ્યાય ।
મુચુકુન્દવરપ્રદાય ।
મુચુકુન્દસ્વપ્નવેલાદર્શિતસ્વાત્મવિગ્રહાય ।
મુચુકુન્દ સપ્તભેદદર્શિતસ્વાત્મરૂપિણે ।
નવવીરસમુપેત મુચુકુન્દસુવન્દિતાય । નવવીરસમાનીત
ષડઙ્ગહંસનટનસમૂલાસ્થિતવિગ્રહાય ।
સામઋગ્યજુરાથર્વવેદવેદિતવિગ્રહાય ।
કુઙ્કુમાઙ્કિતપાદાબ્જાય ।
કર્પૂરાલેપિતાઙ્ગકાય નમઃ । ૩૮૦

ૐ કૃષ્ણાગરુકૃતામોદનાસાયુગલમણ્ડિતાય નમઃ  નમઃ ।
કૃષ્ણગન્ધપ્રિયાય ।
કુષ્ણગન્ધગન્ધિતકર્ણિકાય ।
પ્રલયકાલપ્રવીણપ્રગલ્ભાનન્દતાણ્ડવાય ।

પ્રણવધ્વનિગમ્ભીરમૃગાસક્તકરામ્બુજાય ।
પ્રલયાનલધિક્કારપ્રવીણપરશુભૃતે ।
વરપ્રદાનનિપુણવામપાણિસરોરુહાય ।
ચિન્મુદ્રાઞ્ચિતદક્ષપાણયે ।
ચિત્પ્રદાય ।
ચિત્પ્રબોધકાય ।
મોક્ષવિજ્ઞાપનોદ્ભાસિલમ્બમાનપદામ્બુજાય ।
વીરાસનાન્યપાદાબ્જકૃતકિલ્બિષસંહૃતયે ।
આનન્દનૃત્તવ્યાપારસ્કન્દગૌરીસમન્વિતાય ।
શઙ્ખકાહલસંયુક્તતાલમદ્દલનર્તકાય ।
વીણાવેણુમૃદઙ્ગાદિવાદ્યશ્રવણલોલુપાય ।
પ્રણવાન્તર્ગતજ્યોતિષે ।
કાહલપ્રણવધ્વનયે ।
તાલમદ્દલવાદ્યૌઘધ્વનિસામ્યાજપાનટનાય ।
વિરિઞ્ચિવિષ્ણુસન્તાડ્યતાલમદ્દલજધ્વનયે ।
કાહલીમઙ્ગલારાવસમ્પૂરિતદિગન્તરાય નમઃ । ૪૦૦

ૐ કૌસુમ્ભવસનપ્રીતાય નમઃ ।
દુકૂલવસનાન્વિતાય ।
અનેકપુષ્પવિલસચ્ચીનામ્બરસમાવૃતાય ।
વિચિત્રરેખાસંયુક્તવસનાય ।
વ્યાઘ્રચર્મભૃતે ।
સપ્તસાગરવેલાઢ્યસ્વાત્મવસ્ત્રપરિચ્છદાપ ।
સ્વચ્છવસ્ત્રપરીધાનસર્વાભરણભૂષિતાય ।
વર્ણન્યગ્રોધમૂલસ્થદક્ષિણામૂર્તિસંજ્ઞિતાય ।
શિવજ્ઞાનામૃતનિધયે ।
મુનિવૃન્દનિષેવિતાય ।
વિશ્વન્યગ્રોધમૂલસ્થવિશ્વવ્યાપારશક્તિમતે ।
અન્તર્યજનસુપ્રીતાય ।
ધ્યાનૈકનિરતોત્સુકાય ।
માતૃકાવર્ણપીઠસ્થાય ।
માતૃકાવર્ણવિગ્રહાય ।

મહાપદ્મોન્મનારૂપકર્ણિકાબિન્દુમધ્યગાય ।
મૂલાદિદ્વાદશાન્તસ્થમન્ત્રસિંહાસનસ્થિતાય ।
ગોસૃષ્ટિસ્થિતિસંહારસ્વાપકાલપ્રવર્તકાય ।
વિદ્યારૂપપ્રકાશાત્મને ।
જન્મમૃત્યુજરાપહાય નમઃ । ૪૨૦

ૐ કાલાતીતાય નમઃ ।
કાલહન્ત્રે ।
દેહાહઙ્કારકર્ત્રે ।
મૃત્યુહન્ત્રે ।
મૃત્યુવાહાય ।
મૃત્યુઞ્જયમયાકૃતયે ।
સ્કન્દોમામુખસૌન્દર્યાલોકનોત્સુકલોચનાય ।
સર્વજ્વાલાપ્રભાસીનાય ।
અતિનિર્મલદેહાય ।
સામગાનાનુરઞ્જિતાય ।
સોમસૂર્યાગ્નિરૂપવતે ।
કાર્યકારણરૂપવતે ।
સોમસૂર્યાગ્નિલોચનાય ।
વિશ્વનેત્રાય ।
વિશ્વગર્ભાય ।
વિશ્વેશાય ।
વિશ્વવિગ્રહાય ।
ષટ્છક્તિવ્યક્તમૂર્તયે ।
ષડઙ્ગાવરણોજ્જ્વલાય ।
વેદવેદાઙ્ગકર્ત્રે ।
ત્રયીયુવતિસુન્દરાય ।
શબ્દબ્રહ્માત્મરૂપાય ।
શબ્દબ્રહ્મૈકનૂપુરાય ।
સર્વાધારાદિરૂપાય ।
સર્વશબ્દૈકકારણાય નમઃ । ૪૪૦

ૐ લિઙ્ગત્રયાત્મકાય નમઃ ।

મહાલિઙ્ગમહાતનવે ।
સમાંશકમહાલિઙ્ગાય ।
સ્વાત્મલિઙ્ગસમુદ્ભવાય ।
આઢ્યલિઙ્ગાકૃતયે ।
સુરલિઙ્ગાકૃતયે ।
સ્વયમ્ભૂબાણલિઙ્ગાત્મને ।
પરલિઙ્ગપરાત્પરાય ।
અગ્નિષ્ટોમાત્મલિઙ્ગાય ।
માતૃકાલિઙ્ગાય ।
સ્થૂલલિઙ્ગમહામેરવે ।
સૂક્ષ્મકૈલાસલિઙ્ગકૃતે ।
પઞ્ચલિઙ્ગમયસ્વાત્મને ।
પઞ્ચલિઙ્ગમયાકૃતયે ।
સર્વલિઙ્ગમયાકારાય ।
સહસ્રલિઙ્ગસ્વરૂપિણે ।
વિશ્વાકારમહામેરોઃ સ્વાત્મલિઙ્ગમયોદ્ભવાય ।
શ્યામરત્નસિતજ્યોતિર્જ્યોતિર્લિઙ્ગમહાતનવે ।
પાતાલબુદ્બુદાકારતેજોલિઙ્ગમહાકૃતયે ।
વિદ્યારાજ્ઞીસપ્તકોશાય નમઃ । ૪૬૦

ૐ વિદ્યારાજ્ઞીસમર્ચિતાય નમઃ ।
ઘોરાય ।
શાન્તમહાવિષ્ણવે ।
સર્વતોઽનન્તવક્ત્રકાય ।
સર્વતોઽનન્તપાદાય ।
સર્વતોઽનન્તહસ્તાય ।
અસઙ્ખ્યભુજપાદાય ।
અસઙ્ખ્યાતગુણનિધયે ।
ક્રમાક્રમસમુત્પત્તિરક્ષાસંહારકારકાય ।
સર્વદા સુપ્રદર્શિને ।
માનતર્કાદ્યગોચરાય ।
અસઙ્ખ્યદલસંરાજત્કમલાલયમધ્યગાય ।

ધૃતાર્ચિતજલોદ્ભૂતદીપદીપ્તદિનાન્તરાય ।
ચમત્કારપુરાધીશાય ।
ચમત્કારનૃપાધિપાય ।
ચમત્કારમહીપાલભક્ત્યુદ્ભૂતાચલેશ્વરાય ।
દીપચ્છાયાપ્રત્યયકૃતે ।
હાટકક્ષેત્રનાયકાય ।
અન્તર્ગતેશ્વરાય ।
અન્તર્મુખમનોહરાય નમઃ । ૪૮૦

ૐ વમ્રિરૂપેન્દ્રસઞ્છિન્નસજ્યાવિષ્ણુશિરોધૃતાય નમઃ ।
મહાલક્ષ્મીવરાલ્લભ્યસ્વમાઙ્ગલ્યપતીસુતાય ।
પુત્રાર્થિવિષ્ણુસઙ્કલ્પસિદ્ધિસમ્પત્તિસાધકાય ।
શ્રીવિષ્ણુતપસા પ્રાપ્તસ્વાત્મવલ્મીકસમ્ભવાય ।
વિરાડ્વિષ્ણુસમુત્પન્નવિટઙ્કાત્મસ્વરૂપવતે ।
વિરાડ્વિષ્ણુસમુત્પન્નવિષ્ણુહૃત્પદ્મવાસભુવે ।
ક્ષીરસાગરવૈકુણ્ઠશ્રીવિષ્ણુસ્વાત્મપૂજિતાય ।
સહસ્રપદ્મૈકશૂન્યહરિનેત્રસમર્ચિન્તાય ।
મહાસુરજયોદ્યુક્તવિષ્ણુચક્રપ્રદાયકાય ।
હરિલક્ષ્મીવિધિવાણીગૌરીશચીન્દ્રપૂજિતાય ।
પાદાબ્જપાલિતાજસ્રમુસલાસુરશિક્ષકાય ।
કબન્ધકબલપ્રાપ્તકપર્દાઙ્કિતમસ્તકાય ।
કુરુક્ષેત્રમહાયજ્ઞકોપોદ્ધૃતસ્વકાર્મુકાય ।
અધ્યાત્મદૃષ્ટિસન્દૃશ્યાય ।
અધ્યાત્મજ્ઞાનિવત્સલાય ।
ચમત્કારકલાકર્ત્રે ।
ચમત્કારવચઃપટવે ।
ષટ્છતાધિકવિંશૈકસહસ્રાજપયાન્વિતાય ।
સફલ્ગુન્યજપાસીનતાણ્ડવાડમ્બરોત્સુકાય ।
પુરન્દરમહાયાતમુકુન્દપરિવન્દિતાય નમઃ । ૫૦૦

ૐ હસ્તાદ્યુત્તરાષાઢાન્તષટ્ત્રિંશદ્દિવસોત્સવાય નમઃ ।
ષટ્ત્રિંશત્તત્ત્વબન્ધઘ્નસાઙ્ગોપાઙ્ગમહોત્સવાય ।
મહાર્દ્રોત્સવસમ્પ્રાપ્તજનાનુગ્રહકારકાય ।

દિનાન્તસુપ્રસન્નાત્મદીપસન્દર્શનોત્સુકાય ।
હંસકીકૃતભીગીન્દ્રાય ।
હંસતાણ્ડવસુપ્રીતાય ।
પતઞ્જલિવ્યાઘ્રપાદમુનિમાનસહંસકાય ।
કલાસહસ્રસમ્પૂર્ણમહાદીપાવલોકવતે ।
કર્પૂરધૂલીમિલિતધવલાવયવોજ્જ્વલાય ।
સાયાહ્નદીપસન્દ્રષ્ટૃભક્તાભીષ્ટપ્રદાયકાય ।
ભક્તિમત્પાપતૂલગ્નયે ।
ભક્તિમત્સુલભાભયાય ।
અનન્તપુણ્યફલદાય ।
અનન્તામૃતવારિધયે ।
દિનાષ્ટકનિવિષ્ટાત્મને ।
પાશાષ્ટકવિનાશનાય નમઃ । ૫૨૦

ૐ મહાસ્વાપે જાગરૂકાય નમઃ ।
મહાસન્ધ્યાસુવન્દિતાય ।
મહાદિવસસંસ્થાયિને ।
મહાસંહારકારકાય ।
મધ્યાવાન્તરસંહારસૃષ્ટિસ્થિતિવિધાયકાય ।
મહાવિષ્ણુમહારુદ્રશ્રીકણ્ઠાનન્દવિગ્રહાય ।
મહાસ્વાપસમુદ્ભૂતપઞ્ચકૃત્યપરાયણાય ।
રત્નસિંહાસનાસીનાય ।
રત્નપ્રાસાદમધ્યગાય ।
નવરત્નસભાધીશાય ।
રત્નપ્રાકારમધ્યગાય ।
પઞ્ચાશત્પીઠશક્તિસપરિવારપરીવૃતાય ।
કામરૂપમહાપીઠપરમાનન્દવિગ્રહાય ।
શ્રીપીઠમધ્યવાસિને ।
શ્રીકણ્ઠાદિભિરાવૃતાય ।
નવરત્નગૃહજ્યોતિર્માતૃકાક્ષરમાલિકાય ।
કામેશ્વરીવલ્લભાય ।
મહાકામેશ્વરાકૃતયે ।

આસીનોત્થાનનટનનાનાતાણ્ડવપણ્ડિતાય ।
ઊર્ધ્વતાણ્ડવસંવાદિને નમઃ । ૫૪૦

ૐ પાદવ્યત્યાસતાણ્ડવાય નમઃ ।
સપ્તસાગરપરિખાભભૂમિદુર્ગપરિચ્છદાય ।
જ્યોતિષ્મતીશિખાવાસસર્વદેવગણાવૃતાય ।
યશોવતીપુરીશાનાય ।
મનોવાક્યવિધિસ્તુતાય ।
ભૂબિમ્બસ્થમહામાયાલિપિવૃત્તસમાશ્રયાય ।
પઞ્ચકોશાન્તરપ્રાપ્તત્રિકોણસ્થિતમધ્યગાય ।
અજપાવર્ણવાચ્યાય ।
અજપાજપસુપ્રીતાય ।
સમસ્તજનહૃત્પદ્મજ્વલદ્દીપસમાકૃતયે ।
દેશકાલાનવચ્છિન્નાય ।
દેશકાલપ્રવર્તકાય ।
મહાભોગિને ।
મહાયોગિને ।
મહાસ્યન્દનસુન્દરાય ।
તિરોભાવક્રિયાશક્તિસંસર્ગપશુબન્ધકૃતે ।
અનુગ્રહપરાશક્તિલીલાકલનલોલુપાય ।
નાડીત્રયાન્તવિલસત્સુધાસારાભિવર્ષણાય ।
નાનાવિધરસાસ્વાદમહાનુભવશક્તિમતે ।
સોમસૂર્યાગ્નિપાદ્યાર્ધ્યસુધાબિન્દુસમર્ચિતાય નમઃ । ૫૬૦

ૐ અપરાધસહિષ્ણવે નમઃ ।
શરણાગતવત્સલાય ।
શ્રીમદ્દેવરખણ્ડાત્મને ।
દેવતાસાર્વભૌમાય ।
વીરખડ્ગાભિરામાય ।
સર્વવીરાધિનાયકાય ।
વીરસિંહાસનારૂઢાય ।
મહાવીરાસનસ્થિતાય ।
વિરાટ્હૃદયપદ્મસ્થાય ।

વીર્યોદ્ભૂતવિનાયકાય ।
આધારપદ્મવલ્મીકનાથાય ।
ઘોષસ્વનાત્મકાય ।
સકુલાન્તમહાપદ્મસંરાજત્સમનાકૃતયે ।
બ્રહ્મરન્ધ્રમહાપદ્મકોટિશીતાંશુસન્નિભાય ।
હૃત્પદ્મધ્યસંસ્થાનસૂર્યબિમ્બોપમદ્યુતયે ।
તિથિસઙ્ખ્યફણાદીપ્તમહાકુણ્ડલિભૂષણાય ।
ત્રુટ્યદિકાલપવનફૂત્કારફણિભૂષણાય ।
ઉમાકુમારસહિતાય ।
શ્રીકણ્ઠપુરનાયકાય ।
અનાશ્રિતાદિકાલાગ્નિરુદ્રાન્તભુવનાધિપાય નમઃ । ૫૮૦

ૐ એકાશમહાકોટિરુદ્રાવરણસંસ્થિતાય નમઃ  નમઃ ।
અનેકદ્વાદશાદિત્યમણ્ડલાન્તસમુજ્જ્વલાય ।
અષ્ટકોટિવસુપ્રાજ્ઞપુષ્પપૂજિતપાદુકાય ।
મહાપૂરચતુઃષષ્ટિમણ્ડલાધિપતીશ્વરાય ।
સપ્તલોકાન્ સમાલોક્ય સ્વાત્મપ્રતિમતેજસે ।
સર્વલોકમહાપુણ્યપ્રદર્શિતમહાત્મને ।
વિરિઞ્ચિયજ્ઞસમ્ભૂતકપાલમાલયાયુતાય ।
ઋણત્રયવિનાશાય ।
સ્વર્ણામલકવર્ષિણે ।
દેવતીર્થસકૃત્સ્નાનદેવત્વવરદાયકાય ।
જનનાન્મોક્ષદાનેન જિતચણ્ડકૃતાન્તકાય ।
મરણાન્મોક્ષદાનેન મૃત્યુવાહનતત્પરાય ।
જનનાન્મોક્ષસન્દાયિક્ષિતિમૂલનિવાસિને ।
કૃતમૃત્યુક્રિયાવિષ્ટ-મૃત્યુઞ્જયમયાકૃતયે ।
જન્મમૃત્યુજરાતપ્તજનવિશ્રાન્તિદાયકાય ।
મુનિપક્ષિમૃગેન્દ્રાદિમુક્તિમાર્ગૈકતત્પરાય ।
પિષ્ટાર્થમૃદ્ભૃતો મૂર્ધ્નિ વેત્રપ્રહરચિહ્નિતાય ।
પ્રકૃત્યાકારસગુણસકલીકૃતવિગ્રહાય ।
અસઙ્ખ્યરૂપસઙ્ખ્યાત્મને ।
સર્વનામ્ને ।

સર્વગાય નમઃ । ૬૦૦

ૐ સર્વપ્રજ્ઞાનિવાસાય નમઃ ।
સર્વસઙ્કેતજન્મભુવે ।
સર્વસઙ્કેતસમયકારકાય ।
કરુણાનિધયે ।
જગદ્ભ્રાત્રે ।
જગદ્બાન્ધવાય ।
જગન્માત્રે ।
જગત્પિત્રે ।
કાલજ્ઞાય ।
કાલકર્ત્રે ।
મહાકાલપ્રવર્તકાય ।
અષ્ટાદશાધિકશતમહારુદ્રપ્રપૂજિતય ।
સૌગન્ધિકલસત્પુષ્પસ્રગન્વિતભુજાન્તરાય ।
સર્વસૌન્દર્યનિલયાય ।
સર્વસમ્પત્સમૃદ્ધિમતે ।
દુગ્ધસમ્મિતવાગીશજ્ઞાનદુગ્ધાબ્ધિવાસભુવે ।
શ્રુતિસ્મૃતિપુરાણૈક્યગમ્યવિગ્રહરૂપવતે ।
ચિદ્ઘનસુમહારુદ્રગુરુમન્ત્રેશનાયકાય ।
શ્યામોમારુણસ્કન્દવામભાગમનોહરાય ।
પશ્યન્તીમધ્યમાભિખ્યવૈખર્યાશ્રિતવિગ્રહાય નમઃ । ૬૨૦

ૐ ઘોષમેઘવિદ્યુદાભમહાપદ્માસનપ્રભવે નમઃ ।
વસન્તવાતવિલસદ્બૃહત્પુષ્પાવતંસકાય ।
પ્રાણાપાનાગમપ્રાજ્ઞાય ।
વિશ્વાતીતસ્વરૂપગાય । સુભુજોદ્દણ્ડદૌર્ભાગ્યહરણેઽતિનિપુણાય ।
દુરિતારણ્યદાવાગ્નયે ।
દુષ્ટદૂરતરસ્થિતાય ।
અશેષદેવતાધીશવિષ્ણુહૃત્પદ્મવાસભુવે ।
સ્વપાદહંસકોદ્ભૂતપ્રત્યાહારાર્થસૂત્રકાય ।
સ્વપાદકિઙ્કિણીજાતનવવ્યાકરણાવલયે ।
કામિકાદ્યાગમાકારાય ।

સર્વાવયવવર્જિતાય ।
સર્વાવયવસમ્પન્નાય ।
દ્વાત્રિંશલ્લક્ષણાન્વિતાય ।
સર્વલક્ષણસમ્પન્નાય ।
અનૌપમ્યશુભાકારાય ।
નિસ્તુલાય ।
નિરહઙ્કૃતયે ।
નિરાધારાત્મસર્વવિદે ।
સર્વજ્ઞાય ।
સર્વગોચરાય નમઃ । ૬૪૦

ૐ લૌકિકાગમકર્ત્રે નમઃ ।
વૈદિકોક્તફલપ્રદાય ।
અધ્યાત્મજ્ઞાનકર્ત્રે ।
અતિમાર્ગપ્રવર્તકાય ।
સ્વશક્તિજ્વાલાકલ્પાય ।
સ્વશક્તિકિરણોજ્જ્વલાય ।
સ્વશક્તયે ।
લીનવિગ્રહાય  ।
લોકાતિશયસૌન્દર્યનિધયે ।
અન્તર્બહિર્ગતાય ।
સામ્ના શક્ત્યેકાશીતિપાદુકાય ।
પરમાર્થદાય ।
વરપ્રાસાદચક્રસ્થદ્રુમવર્ણત્રયાત્મકાય ।
શુદ્ધપ્રપઞ્ચસૃષ્ટ્યાદિકર્તૃસિદ્ધાન્તબોધકાય ।
મહત્પરાદિસમ્બન્ધગુરુસન્તાનબોધકાય ।
ધર્માધિષ્ઠાનચક્રસ્થભૂતગ્રામવિવર્તકાય ।
નિષ્પ્રપઞ્ચાય ।
નિરાકારાય ।
ધ્યાતૃમાનસમન્દિરાય ।
મહામાયાસુધાસિન્ધવે ।
પરાનન્દામૃતોદધયે ।

અશેષદુઃખતરણજ્ઞાનાનન્દસુબોધકાય ।
વિરાણ્મૂલાલયામ્ભોજમહામન્દિરમધ્યગાય નમઃ । ૬૬૦

ૐ પરમાનન્દસન્દોહમન્દસ્મિતમુખામ્બુજાય નમઃ ।
કરોટિમાલાકલિતહરિગર્વનિવારકાય ।
લલાટનેત્રદહનભસ્મીકૃતમનોભવાય ।
કવચીકૃતષટ્ચક્રતિરોધાનમહેશ્વરાય ।
બાહ્યદૃષ્ટ્યપ્રમેયાઙ્ગાય ।
જ્ઞાનદૃષ્ટ્યવલોકિતાય ।
પઞ્ચમૂર્ધફણીશાનતિરોહિતપદામ્બુજાય ।
ત્રિલોકસંરક્ષણાર્થાય રાજવેષધરાય ।
પુષ્પાત્મરથસમ્પ્રીતાય ।
પુણ્યભૂમિનિવેશિતાપ ।
પુરુહૂતાર્ચિતપુણ્યાય ।
પુરુહૂતાઘમોચનાય ।
સૌન્દર્યસિન્ધુસમ્ભૂતનિશાકરસમાકૃતયે ।
જઘન્યજન્મવિચ્છેત્રે ।
દેવેન્દ્રસ્ય વરપ્રદાય ।
પુરન્દરમહાઘોરચણ્ડાલત્વવિમોચકાય ।
કૃતપાણિગ્રહોદારગુણેન્દ્રાણીપુરન્દરાય ।
દેવરાજમહાઘોરગુલ્મરોગનિવારકાય ।
પુરન્દરમહાશાપપુરોગમસમુત્સુકાય ।
શિલાદજાત્મજેનાશુ નન્દિકેશાધિકારિતાય નમઃ । ૬૮૦

ૐ સુમેરુશ‍ૃઙ્ગમૂલસ્થવિશ્વસૃષ્ટ્યાદ્યકારકાય નમઃ ।
આમૂલદ્વાદશાન્તાદ્યાધારાદિષુ વાસિતાય ।
અદ્વિતીયચિદાનન્દઘનકલ્યાણસુન્દરાય ।
અશેષકલુષારણ્યદાવાનલશિખાયુતાય ।
દશપ્રાણમહાભૂતપ્રાણાયામકચિન્મયાય ।
આનન્દચિત્સભાશૈલાદ્રિનિર્ગતવિભાવસવે ।
તેજોમણ્ડલમધ્યસ્થચિદાનન્દદિવાકરાય ।
ભાનુમણ્ડલમધ્યસ્થાય ।
ચન્દ્રમણ્ડલમધ્યગાય ।

તેજોમણ્ડલમધ્યસ્થાય ।
તેજસ્વિને ।
તેજસાં નિધયે ।
કાલાધિદૈવતાય ।
કાલાય ।
અવસ્થાનીતમૂર્તિમતે ।
કાલહન્ત્રે ।
કાલરૂપિણે ।
સર્વકાલપ્રવર્તકાય ।
ચતુરન્તાયતમૂર્તયે ।
સર્વાવસ્થાપ્રવર્તકાય નમઃ । ૭૦૦

ૐ ચતુરામ્નાયમૂર્તયે નમઃ ।
ષડઙ્ગાવરણોજ્જ્વલાય ।
મીમાંસામાંસલાંસાય ।
તર્કશાસ્ત્રકશેરુકાય ।
પુરાણેન્દ્રિયસંયુક્તાય ।
ધર્મશાસ્ત્રાત્મચેતનાય ।
ષટ્સ્મૃતિચતુર્વેદધનુર્વેદપ્રતાપવતે ।
ગાન્ધર્વવેદગાનાઢ્યાય ।
આયુર્વેદારોગ્યવિદે ।
અવર્ણવિગ્રહજ્યોતિષે ।
નાટ્યકાદિરસાન્વિતાય ।
ચતુઃષષ્ટિકલારૂપસર્વાવયવસુન્દરાય ।
મનોવાઙ્મયદેહાય ।
શબ્દબ્રહ્મસ્વરૂપવતે ।
ભક્તેષ્ટચિત્તશુદ્ધ્યર્થં શાકીકૃતશિશૂત્સવાય ।
ઉમાસ્કન્દાદિસહિતમહાચણ્ડાલવેષભૃતે ।
સોમયાજિમહાયાગપ્રવેશવ્યગ્રવિગ્રહાય ।
સોમપૂજ્યસોમયુતસોમસુન્દરવિગ્રહાય ।
સોમયાજિમહાભક્તિવ્યક્તિસન્તુષ્ટમાનસાય ।
પદદ્વયૈર્નટત્સોમહવિર્ભાગપ્રતિગ્રહાય નમઃ । ૭૨૦

ૐ સોમસૂર્યાગ્નિનાડ્યન્તર્વીથીસઞ્ચારસુન્દરાય નમઃ  નમઃ ।
હંસમન્ત્રાક્ષરદ્વન્દ્વવાચ્યાય ।
વિશ્વાઘમોચકાય ।
દિગ્દેશકાલરહિતાનન્યાય ।
અચિન્ત્યરૂપવતે ।
શતોપનિષદુદ્ઘુષ્ટનિત્યાખણ્ડપ્રકાશકૃતે ।
કલાપઞ્ચકકાલાદિત્યાગરાજતટિત્પ્રભવે ।
સુપ્રસન્નેન્દ્રિયગ્રામાય ।
સર્વપ્રત્યક્ષદર્શનાય ।
કૃશાનુરેતસે ।
સર્વાત્મને ।
ઊર્ધ્વરેતસે ।
જિતેન્દ્રિયાય ।
સમસ્તગુણસમ્પન્નાય ।
સર્વાપગુણવર્જિતાય ।
નિષ્પ્રપઞ્ચાય ।
પ્રપઞ્ચાત્મને ।
સેન્દ્રિયાય ।
નિરિન્દ્રિયાય ।
શાન્ત્યાદિષડ્ગુણોપેતાય નમઃ । ૭૪૦

ૐ મોહાદ્યખિલદોષહૃતે નમઃ ।
નિર્મલાય ।
મલધ્વંસિને ।
શાન્તશાશ્વતવિગ્રહાય ।
સુષુમ્નાન્તઃસમુદિતનાદરૂપિણે ।
નટાધિપાય ।
નિઃશ્વાસલીલાસઞ્જાતનિગમાગમસન્તતયે ।
દેશિકાદિષ્ટમાર્ગૈકદૃશ્યાય ।
દેશિકપુઙ્ગવાય ।
વક્ત્રે ।
વાચાલકાય ।

વાચ્યાય ।
કૈવર્તરૂપોદ્વહાય ।
જ્ઞાનજ્ઞાતૃજ્ઞેયરૂપાય ।
અજ્ઞાનજ્ઞાનગોચરાય ।
કૃશાનુભાનુચન્દ્રાત્મને ।
ત્રેતાગ્નિપવનાકૃતયે ।
દિવાસન્ધ્યાનિશાऽऽકારાય ।
સન્ધ્યાત્રયનિષેવિતાય ।
ગાયત્રીમન્ત્રવેદ્યાય નમઃ । ૭૬૦

ૐ ગાયત્રીત્રિપદાત્મકાય નમઃ ।
વાગ્બીજકામરાજાખ્યપરાબીજત્રયાભિધાય ।
ષડ્વિધૈક્યાનુસન્ધાનપરદેશિકદર્શિતાય ।
ષડ્વિધાર્થસ્વરૂપેણ ષડક્ષરમયાકૃતયે ।
ત્રયીદર્શિતમૂર્ત્યાત્મમન્ત્રમૂર્તિમહાતનવે ।
શબ્દાર્થમાત્રસામાન્યબિન્દુમૂર્તિત્રયોજ્જ્વલાય ।
સન્ધ્યાત્રયાત્મસ્વરૂપત્રિસન્ધ્યાપરિવર્જિતાય ।
વિશ્વાત્મવેદ્યવેદાન્તત્રયીસિદ્ધાન્તદર્શિતાય ।
સચ્ચિદાનન્દવિધૃતસોમાસ્કન્દમહેશ્વરાય ।
સમસ્તજનનિધ્યાતચિત્તામ્બુજસુખાસનાય ।
પુરુષાર્થપ્રદાય ।
પૂર્ણાય ।
હેયોપાદેયવર્જિતાય ।
સવિમર્શપ્રકાશાત્મસહજાનન્દવિગ્રહાય ।
શિવશક્તિસ્વરૂપાત્મશક્તિશક્તિમદાકૃતયે ।
તત્પદર્થૈકસ્વરૂપાત્મતત્ત્વમ્પદસુલક્ષિતાય ।
આવૃત્તિત્રયસમ્પૂજ્યત્રિલોકીપરિરક્ષિતાય ।
રત્નસ્તમ્ભસહસ્રાઢ્યકલાસમ્પૂર્ણમન્દિરાય ।
આસીનસ્પન્દનટનપરશમ્ભુપરાસખાય ।
સહસ્રભાનુસદૃશાય ।
ચન્દ્રકોટિસુશીતલાય નમઃ । ૭૮૦

ૐ અપારકરુણાસિન્ધવે નમઃ ।

અસઙ્ખ્યમહિમાર્ણવાય ।
સર્વજ્ઞતાદિષાડ્ગુણ્યસંયુતસ્વાત્મવૈભવાય ।
પઞ્ચાશદ્વર્ણમધ્યસ્થપરાપ્રાસાદમન્ત્રગાય ।
પઞ્ચાશદ્વર્ણરાજ્ઞીભિઃ સ્તુતશામ્ભવવૈભવાય ।
તેજઃપઞ્ચકબિમ્બોદ્યદ્દીપજ્વાલાવલોકનાય ।
સોમસૂર્યાગ્નિનક્ષત્રવિદ્યુત્પ્રતિમતેજસે ।
શ્રીવિદ્યારાજ્ઞીકરામ્ભોજકૃતકૌતુકમઙ્ગલાય ।
મેઘધ્વનિસમાલાપાય ।
વલ્મીકસાધ્વસધ્વનયે ।
યજ્ઞેશ્વરાય ।
યજ્ઞમયાય ।
મહાયજ્ઞક્રમાવૃતાય ।
જપયજ્ઞક્રિયાજ્ઞાનતોષિતધ્વનયે ।
મન્ત્રવિદે ।
વાગર્થરૂપાય ।
વાગીશાય ।
ત્રિકાલપ્રણવાભિધાય ।
ભક્તોત્સુકાય ।
ભક્તિગમ્યાય ।
ભક્તિ ગીતસ્તવોન્મુખાય નમઃ । ૮૦૦

ૐ દૃષ્ટાદૃષ્ટાનેકમૂર્તયે નમઃ ।
દુષ્ટારિબલમર્દનાય ।
શિવોત્તમાય ।
શિવતમાય ।
શિવદાત્રે ।
શિવાપ્રિયાય ।
શિવાનન્દમયાકારાય ।
શિવાપ્રેમવિધાયકાય ।
શિવામૃતાબ્ધિશીતાંશવે ।
શિવાનન્દામૃતાર્ણવાય ।
શિવાક્ષરપરઞ્જયોતિષે ।

શિવાઙ્ગાધિકસુન્દરાય ।
શિવાસંસક્તહૃદયાય ।
શિવાતોષિતમાનસાય ।
શિવાક્ષરદ્વયાકારાય ।
શિવાગમમુખામ્બુજાય ।
શિવશ‍ૃઙ્ગારવેષાઢ્યાય ।
શિવાકલ્યાણસુન્દરાય ।
શિવાગમૈકનિલયાય ।
શિવોઽહમ્ભાવના-પ્રીતાય નમઃ । ૮૨૦

ૐ શિવજીવાત્મબોધકાય નમઃ ।
શિવમન્ત્રોપદેશકાય ।
શિવાગમોક્તનિયમાય । ગમાય
શિવાગમનદીપકાય ।
શિવમન્ત્રજ્ઞમુક્તિદાય ।
શિવમન્ત્રજપપ્રિયાય ।
ભૂતાધિપાય ।
ભૂથનાથાય ।
ભૂતવાહનસુન્દરાય ।
ભૂતનાટ્યોત્સુકાય ।
ભૂતસન્દોહસુપ્રિયાય ।
ભૂતચક્રારાધિતાય ।
ભૂતસઙ્ઘસમાવૃતાય ।
ભૂતાદિકાલવેત્રે ।
ભૂતિભૂષિતવિગ્રહાય ।
ભૂતસઙ્ઘપ્રપૂજિતાય ।
ભૂતપઞ્ચકવિગ્રહાય ।
લક્ષકોટિમહાભૂતગણસંરક્ષકાવૃતાય ।
કોટિકોટિમહાભૂતરક્ષિતાણ્ડબહિઃસ્થલાય ।
પુણ્યાપુણ્યવિનિર્મુક્તપુણ્યાપુણ્યસમેક્ષણાય નમઃ । ૮૪૦

ૐ સકૃત્સન્દર્શનાદેવ સુરેન્દ્રપદદાયકાય નમઃ ।
પુણ્યશ્રવણકીર્ત્યાત્મને ।

પુણ્યાપુણ્યફલપ્રદાય ।
કરાલમુખકૃષ્ણાઙ્ગાય ।
કૃષ્ણાજિનસુલાઞ્છિતાય ।
કોટિચન્દ્રપ્રભાકારપૂર્ણચન્દ્રનિભાનનાય ।
મહાકૈરાતવેષાઢ્યપાર્થપ્રહરમૂર્ધકાય ।
મહાપાશુપતાસ્ત્રેશદાનતોષિતપાણ્ડવાય ।
મહાગણેશવિધ્વસ્તવિઘ્નસિદ્ધૌઘવન્દિતાય ।
મહાપ્રલયંસભૂતસર્વપ્રાણ્યુપસંહૃતયે ।
મહાપ્રલયકાલાન્તસૃષ્ટિસ્થિતિવિધાયકાય ।
મૂલાત્મકોષઃકાલસ્થમુદ્ગાન્નપ્રિયમાનસાય ।
સ્વાધિષ્ઠાનાત્મકપ્રાતર્દધ્યન્નપ્રિયમાનસાય ।
મણિપૂરાત્મમધ્યાહ્નઘૃતમુદ્ગાન્નમાનસાય ।
અનાહતાત્મસાયાહ્નગુળાન્નપ્રિયમાનસાય ।
વિશુદ્ધયાત્મનિશાસન્ધ્યાપાયસાન્નપ્રિયાત્મકાય ।
આજ્ઞાત્મકાર્ધયામસ્થસર્વાન્નપ્રિયમાનસાય ।
સમુદ્ગશર્કરાજ્યાન્નમાષાપૂપરસપ્રિયાય ।
સમુદ્ગચોચકૈર્મિશ્રસૂચીઘનબહુપ્રિયાય ।
નાનાકોણમધુચ્છિદ્રનાનાભક્ષ્યબહુપ્રિયાય નમઃ । ૮૬૦

ૐ લીલામાત્રકૃતાનેકજગદુત્પત્તિનાશનાય નમઃ ।
અવ્યાજકરુણામૂર્તયે ।
અજ્ઞાનધ્વાન્તભાસ્કરાય ।
માર્તાણ્ડભૈરવારાધ્યવીરખડ્ગવિરાજિતાય ।
વીરભદ્રસમારાધ્યવૃષભેન્દ્રવિલાસિતાય ।
વેદમાર્ગૈકનિપુણાય ।
વેદાન્તપરિનિષ્ઠિતાય ।
વૈદિકાચારસમ્પન્નાય ।
વામદેવવરપ્રદાય ।
ઊર્ધ્વસ્વાયમ્ભુવાદૃશ્યાય ।
દિવ્યસ્વાયમ્ભુવાત્મકાય ।
મન્વાત્મને ।
શૈવસમ્પન્નાય ।

સકૃત્સન્તાનબોધકાય ।
કમલાપતિસંસેવ્યકમલાસનપૂજિતાય ।
ઉક્ષપતાકાપતયે ।
હરાય ।
આરૂઢવૃષધ્વજાય ।
અજય્યગોપદીપ્યગ્રાય ।
મહાકારુણિકોત્તમાય ।
જગત્પ્રદીપરૂપિણે ।
લોકત્રયવિભાવનાય નમઃ । ૮૮૦

ૐ જગદ્ધિતૈષિણે નમઃ ।
દિવ્યાત્મને ।
શ્રીમતે અમિતવિગ્રહાય ।
મહાગ્રાસાય ।
મહામાનિને ।
ક્ષયદ્વીરાય ।
શાશ્વતાય ।
શ્રીક્ષેત્રભૈરવાય ।
કૈવર્તકન્યકોદ્વહાય ।
નૃસિંહહન્ત્રે ।
કામારયે ।
વિષ્ણુમાયાન્તકાય ।
ત્ર્યમ્બકાય ।
શિપિવિષ્ટાય ।
મખારયે ।
નીલલોહિતાય ।
મહાપ્રાણાય ।
મહાજીવાય ।
પ્રાણાપાનપ્રવર્તકાય ।
વ્યોમવ્યાપિને ।
વ્યોમરૂપાય નમઃ । ૯૦૦

ૐ વ્યોમસૂક્ષ્માય નમઃ ।

વિરાણ્મયાય ।
એકાધિપત્યસામ્રાજ્યપ્રદાય ।
એકાન્તપૂજિતાય ।
દ્વિરૂપશિવશક્ત્યાત્મને ।
હંસદિવ્યાક્ષરાભિધાય ।
ત્રિમાત્રપ્રણવધ્યેયાય ।
ત્ર્યક્ષાય ।
ત્રિજગદીશ્વરાય ।
ચતુર્મુખાદિસંસેવ્યાય ।
ચતુર્વર્ગફલપ્રદાય ।
પઞ્ચાક્ષરપરઞ્જ્યોતિષે ।
પઞ્ચાક્ષરમયાકૃતયે ।
પઞ્ચાક્ષરપ્રાણરૂપાય ।
પઞ્ચાક્ષરજપપ્રિયાય ।
પઞ્ચાક્ષરગ્રહાધીશાય ।
પઞ્ચાક્ષરતિરોહિતાય ।
પઞ્ચાક્ષરસદાવ્યાપિને ।
પઞ્ચાક્ષરપુરેશ્વરાય ।
પઞ્ચાક્ષરપ્રમાણજ્ઞાય નમઃ । ૯૨૦

ૐ પઞ્ચાક્ષરકમુક્તિદાય નમઃ ।
પઞ્ચાક્ષરવિદીપ્તાય ।
પઞ્ચાક્ષરફલપ્રદાય ।
પઞ્ચાક્ષરનિવાસીનક્ષીરાર્ણવમણયે ।
નટાય ।
પઞ્ચાક્ષરમહામન્ત્રશબ્દબ્રહ્માક્ષરોજ્જ્વલાય ।
ચતુઃષષ્ટિકલાતીર્થદેવતાકોટિસંશ્રિતાય ।
શ્રીમત્સ્વાત્મકલામૂર્ધ્નિ જટાગઙ્ગાકલાધરાય ।
શ્રીમદ્ભગીરથેન્દ્રાય ભૂવારાણસિદર્શકાય ।
શ્રીમત્કાત્યાયનીમુખ્યશક્તિપાણિગ્રહોત્સુકાય ।
ષડઙ્ગસંસ્થિતાય ।
સપ્તકોટીશ્વરનિષેવિતાય ।

અષ્ટમૂર્તયે ।
અનેકાત્મને ।
અષ્ટૈશ્વર્યફલપ્રદાય ।
નવતત્વાતીતમૂર્તયે ।
નવાક્ષરજપપ્રિયાય ।
દશાયુધાય ।
દશભુજાય ।
દશદિગ્વ્યાપ્તવિગ્રહાય ।
એકાદશમહારુદ્રરૂપિણે ।
સર્વજગત્પ્રભવે ।
ભૂલોકજનપુણ્યૌઘસમ્પ્રાપ્તકમલાલયાય ।
શુદ્ધસ્ફટિકસઙ્કાશસ્મિતશોભિમુખામ્બુજાય ।
દયાતરઙ્ગિતાપાઙ્ગવિલોકનવિલાસવતે  નમઃ । ૯૪૦

ૐ વરદાભીતિપરશુમૃગાસક્તકરામ્બુજાય નમઃ ।
કોટિકન્દર્પલાવણ્યપુણ્યસર્વાઙ્ગસુન્દરાય ।
સૌન્દર્યલહરીપૂર્ણરાજકુમ્ભેશવિગ્રહાય ।
નિજાવયવગન્ધશ્રીસુગન્ધિતદિગન્તરાય ।
શ્રવણાનન્દસન્દાયિસૌન્દર્યમૃદુભાષણાય ।
કર્પૂરધૂલિમિલિતભસ્મોદ્ધૂલિતપાણ્ડરાય ।
મહામૃગમદોદ્દામકૃષ્ણગન્ધસુગન્ધિતાય ।
કર્પૂરકુઙ્કુમાઘૃષ્ટચન્દનદ્રવચર્ચિતાય ।
કાલાગરુકૃતાનેકધૂપામોદસુમોદિતાય ।
ગવ્યનિર્વર્તિતાનેકપ્રદીપાવલિભાસુરાય ।
સમુદ્રગરલભ્રાજદ્ગલસ્થલસુશોભિતાય ।
તિલોત્તમોર્વશીરમ્ભાકલ્પિતારાત્રિકક્રમાય ।
સાયન્તનમહાદીપમઙ્ગલારાધનક્રમાય ।
દર્પણાન્તર્ગતસ્વાત્મપ્રતિબિમ્બનિભેક્ષણાય ।
ચન્દ્રમણ્ડલસઙ્કાશશ્વેતચ્છત્રવિરાજિતાય ।
પાર્શ્વદ્વયપરિભ્રાજચ્ચામરાવલિરાજિતાય ।
તાપિઞ્છનીલપિઞ્છૌઘચ્છાયાસઞ્છાદિતામ્બરાય ।
મયૂરવ્યજનોદ્ભૂતમન્દમારુતસન્તતયે ।

ઋગ્યજુઃસામજસ્તોત્રશ્રવણોત્સુકમાનસાય ।
તરુણીભિઃ સમારબ્ધશુદ્ધનૃત્તેક્ષણપ્રિયાય નમઃ । ૯૬૦

ૐ પઞ્ચબ્રહ્મષડઙ્ગાર્ણપઞ્ચબ્રહ્મષડઙ્ગકાય નમઃ ।
એકમન્ત્રષડઙ્ગાર્ણપઞ્ચબ્રહ્મષડઙ્ગવતે ।
અષ્ટત્રિંશત્કલાક્લૃપ્તતનુવીક્ષણવૈભવાય ।
વ્યોમવ્યાપિમહામન્ત્રવર્ણિતનેકશક્તિકાય ।
અનન્તાદિશિવધ્યાનનન્દિભૃઙ્ગ્યાદિસેવિતાય ।
દશાયુધાદિદિક્પાલૈર્દિક્પતિદ્વિદશાવૃતાય ।
શતરુદ્રાવૃતપ્રાન્તસહસ્રગણપાવૃતાય ।
સિદ્ધગન્ધર્વયક્ષાદિદેવસઙ્ઘનિષેવિતાય ।
અનેકજન્મસંસિદ્ધપુણ્યલભ્યપદામ્બુજાય ।
નિત્યતૃપ્તાનાદિબોધસ્વતન્ત્રાલુપ્ત્યનન્તકાય ।
પ્રત્યુપ્તનવરત્નૌઘસિંહાસનવરસ્થિતાય ।
ભક્તાભીષ્ટપ્રદાય ।
સાક્ષાત્સકલીકૃતવિગ્રહાય ।
વસન્તવાતસન્તુષ્ટાય ।
વસન્તનર્તનોત્સુકાય ।
શ્રીનીલોત્પલનાયક્યાઃપાણિગ્રહણભાસ્વરાય ।
સંસારતાપવિચ્છેત્રે ।
મહાસંસારકારકાય ।
ઈષણારહિતોદ્યુક્તશિવજ્ઞાનપ્રદાયકાય ।
હાટકક્ષેત્રસમ્ભૂતજીવન્મુક્તિપ્રદાયકાય ।
હાટકાભરણાબદ્ધસર્વાવયવશોભિતાય નમઃ । ૯૮૦

ૐ શેખરીકૃતશીતાંશુજાહ્નવીબદ્ધમસ્તકાય નમઃ ।
શરચ્ચન્દ્રસમાકારવદનાય ।
મઞ્જુલસ્વનાય ।
પ્રલયાગ્નિસમાકારહાલાહલવિષાશનાય ।
અનેકકોટિબ્રહ્માણ્ડનાયકાય ।
નીલકન્ધરાય ।
કનકાઙ્ગદકેયૂરકમનીયભુજાન્વિતાય ।
ઝલઞ્ઝલિતશબ્દૌઘકટકાબદ્ધપાદુકાય ।

વ્યાઘ્રચર્મધરાય ।
વ્યાઘ્રપાદપૂજિતપાદુકાય ।
આનન્દવનમધ્યસ્થાય ।
સર્વાનન્દવિધાયકાય ।
સિદ્ધેશ્વરાય ।
સર્વસિદ્ધપૂજિતાય ।
પરમાદ્ભુતાય ।
ષષ્ટિત્રિંશત્સઙ્ખ્યાતલીલાકલ્પિતવિગ્રહાય ।
લોકસંરક્ષણાર્થાય રાજવેષધરાય ।
નાનાવિચિત્રવેષાઢ્યાય ।
નાનાસિદ્ધાન્તવેદિને ।
દિવ્યશ‍ૃઙ્ગારવેષાઢ્યાય ।
નામરૂપવિવર્જિતાય નમઃ । ૧૦૦૦

ૐ દિગમ્બરાય નમઃ ।
અવ્યયાય ।
શ‍ૃઙ્ગારવનમધ્યગાય ।
ભૂદારરૂપવૈકુણ્ઠપરિમૃગ્યપદામ્બુજાય ।
હંસરૂપહંસવાહાદૃષ્ટશિરસે ।
લેલિહાનમહાઘોરમહાતેજઃસ્વરૂપવતે ।
ચન્દ્રહાસદ્વયયુતચન્દ્રહાસમુખાન્વિતાય ।
વીથીવિટઙ્કસામ્બાય ।
સ્વાત્મપૂજનતત્પરાય ।
મહાભિષેકનૈવેદ્યમહાપૂજનતત્પરાય ।
વિરાડાધારમૂલસ્થત્યાગારાજમહેશ્વરાય ।
શ્રીસોમાસ્કન્દવીથીવિટઙ્કસામ્બપરમેશ્વરાય નમઃ । ૧૦૧૦
શ્રીત્યાગરાજાય ।
કૃપાનિધયે ।
દયાનિધયે નમઃ ।

ઇતિ શ્રીત્યાગરાજ-મુચુકુન્દ-સહસ્રનામાવલી સમાપ્તા ।

Encoded by Sivakumar Thyagarajan shivakumar24 at gmail.com

Proofread by Sivakumar Thyagarajan, PSA Raswaran psaeaswaran at gmail.com

The name count exceeds way over 1000.
Additional names are due to longer combined names split appropriately.

---

*Shri Tyagaraja Muchukunda Sahasranamavali*
pdf was typeset on April 18, 2020

Please send corrections to *sanskrit@cheerful.com*